# रसशास्त्रस्य परिप्रेक्ष्ये
# रसः इति पदस्य अर्थनिरूपणम्

**अभिषेकः मुखार्जी**
**वरिष्ठानुसन्धाता**
**संस्कृतसंवर्धनप्रतिष्ठानम्**
abhisekrkmv@gmail.com

**शोधसारांशः**

उपनिषदि[1] विद्या द्विविधा उक्ता अस्ति परा अपरा च इति। तत्र पराविद्यया ब्रह्मविद्या आत्मविद्या वा प्रतिपादिता। अनया अक्षरस्य ज्ञानं भवति। न क्षरति इति व्युत्पत्त्या अक्षरेण अविनाशिनः कूटस्थस्य नित्यस्य आत्मनः बोधः भवति। एतस्याः ब्रह्मविद्यायाः लाभः केवलं धर्ममार्गेणैव साध्यते। अस्माकं शरीरम् एव धर्मसाधनस्य[2] कर्मसाधनस्य वा क्षेत्रम् अस्ति। अतः धर्माचरणाय शरीरं सुष्ठु संरक्षणीयम्। यद्यपि इदं शरीरं नश्वरम् अस्ति तथापि अस्य सुष्ठु परिचालनेन अस्माकं भुक्तिः मुक्तिः च इति उभयोः प्राप्तिः संसाध्यते। अस्मिन् जगति शरीरम् अकृत्रिमरूपेण तथा च प्राकृतिकरूपेण संरक्षितुं केवलं रसविद्या एव पर्याप्ता अस्ति। तदर्थम् उच्यते -

**रसविद्या परा विद्या त्रैलोक्येऽपि सुदुर्लभा।**
**भुक्तिमुक्तिकरी यस्मात् तस्माद्देया गुणान्वितैः ॥**[3] इति

रसविद्या नाम रसस्य ज्ञानं तस्य समुचितः प्रयोगश्च इति। एषा विद्या श्रेष्ठा उत्तमा च इति रसज्ञानां सिद्धान्तः अस्ति। स्वर्गादिषु त्रिलोकेषु एषा विद्या दुर्लभा अस्ति। अपि च ऐहिकान् ऐश्वर्यभोगान् सुचारुतया सम्पादयितुं संसारिकेभ्यः दुःखेभ्यः मुक्तिं च प्रदातुं रसविद्या अद्वितीया अस्ति। शास्त्रान्तरेषु भिन्नार्थेषु रसशब्दः प्रयुज्यते चेत् अपि रसायनशास्त्रे बाहुल्येन रसः इत्यनेन पारदस्यैव ग्रहणं भवति। अस्य पारदस्य सेवनेन त्रिविधेभ्यः पापेभ्यः[4], त्रिविधेभ्यः तापेभ्यः[5] त्रिविधेभ्यः दोषेभ्यः[6] च उत्पन्नाः त्रिविधाः रोगाः[7] विनष्टाः भवन्ति। अपि च अनेन मनुष्याः ब्रह्मज्ञानिनां दुर्लभं पदम् (मोक्षपदम्) अपि प्राप्नुवन्ति। मया प्रस्तुतः अयं लघुः प्रबन्धः सामान्यतया विविधेषु क्षेत्रेषु रसस्य परिभाषाः प्रतिपाद्य रसशास्त्रे रसपदस्यार्थं प्रतिपादयति।

'रस्यते आस्वाद्यते' इति रसः। "रस आस्वादनस्नेहनयोः" इति चुरादिगणीयधातोः *पुंसि संज्ञायां घः प्रायेण (३/३/११८)* इत्यनेन घ-प्रत्ययेन **रस** इति शब्दः निष्पद्यते। विभिन्नेषु क्षेत्रेषु रसशब्दः विभिन्नार्थे प्रतीयते। "रसनाग्राह्यो गुणो रसः[8]" इति न्यायवैशेषिकयोः मतम् अस्ति। यथा लोके अपि सामान्यतया **षट् रसाः** एव सुपरिचिताः सन्ति, ते यथा मधुरः, अम्लः, लवणः, कटुः, कषायः तिक्तः चेति। एते रसनेन्द्रियग्राह्याः भवन्ति। तथैव साहित्येषु अर्थात् यत्र शब्दार्थयोः सान्निध्यं वर्तते तेषु रामायणादिषु अपि रसाः वर्तन्ते। एतेषु साहित्येषु विद्यमानाः नैके रसाः रसनेद्रियग्रह्याः न अपि तु अनुभूतिग्राह्याः भवन्ति। नाट्यशास्त्रस्य प्रणेता भरतमुनिः, तस्य मतानुसारम् "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति। अर्थात् विभावः, अनुभावः सञ्चारिभावः च इत्येतेषां संयोगेन

[1] मुण्डकोपनिषद् १.१.४
[2] शरीरमाद्यं खलु धर्मसाधनम् - कुमारसम्भवः
[3] रसार्णवम्, १. ४६
[4] कायिकं वाचिकं मानसिकं च
[5] दैहिकम्, दैविकं भौतिकं च
[6] वातम्, पित्तं कफं च
[7] वातिकम्, पैत्तिकं श्लैष्मिकं च
[8] "स च मधुराम्ललवणकाटुकषायतिक्तभेदाद् षड्विधः" - तर्कसंग्रहः

रसस्य उत्पत्तिः भवति । रसस्य शाब्दिकार्थः आनन्दः इति । श्रव्यकाव्यस्य पठनेन श्रवणेन वा दृश्यकाव्यस्य दर्शनेन श्रवणेन च यः अलौकिकः आनन्दः मनसि जायते साहित्ये सः एव **रसः** इति उच्यते । रसः एव काव्यस्य आत्मा इति विद्वांसः मन्यन्ते । श्रुतिवचने "रसो वै सः । रसं ह्येवायं लब्ध्वानन्दी भवति"[9] अर्थात् परमात्मा एव रसरूपी आनन्दः भवति । अस्माकम् इदं शरीरम् अन्नमयादीनां पञ्चकोशानां समष्टिः भवति । अन्नात् एव शरीरे रसोत्पत्तिः भवति । अयं रसः शरीरस्य विभिन्नेषु भागेषु भिन्नतया कार्यं करोति । सः एव रसः अन्तःकरणस्य काचन तादृशी शक्तिः भवति यया इन्द्रियाणि स्वस्वकार्ये प्रवृत्तानि भवन्ति, यथा मनः चिन्तयति, चक्षुरादीनि इन्द्रियाणि दर्शनादिषु च प्रवर्तन्ते । रसः आनन्दरूपी भवति, एषः आनन्दः पुनः विराजः[10] अनुभावकः अपि भवति । एषः आनन्दः अन्यान् सर्वान् अनुभवान् अतिक्रामति । द्वितीयतः अवयव-तत्त्वरूपेण अपि रसः परिगण्यते । सर्वस्मिन् नष्टे सति अपि यत् भावरूपेण वस्तुरूपेण वा जीवति स एव **रसः** भवति । पुनश्च रसरूपेण यस्य निष्पत्तिः भवति स एव **भावः** भवति ।

## रसायने रसः

**यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम् ।**
**स्वस्थस्यौजस्करं यत्तु तद् वृष्यं तद्रसायनम् ॥**[11]

इत्यनुसारं रसायनं हि भेषजं भवति । भेषं रोगं जयति यत् तत् औषधं **भेषज**मिति उच्यते । पूर्वजन्मनि कृतानां सत्कर्मणां फलेनैव मनुष्याणाम् उत्तमे वंशे जन्म भवति । ततः साधारणतः मनुष्याः संसारे नानाविधेषु भोगेषु त्यागेषु च स्वजीवनं यापयन्ति । सर्वासु परिस्थितिषु शरीरम् एव शरणं भवति । किन्तु इदं शरीरं विनाशि अस्ति । अतः सर्वविधाः सामग्र्यः वृथाः इति विचिन्त्य सदैव मुक्तिप्राप्तये प्रयत्नः करणीयः । सा मुक्तिः पुनः यथार्थज्ञानेनैव भवति । यथार्थज्ञानं योगाभ्यासात् आयाति, योगाभ्यासः व्याधिरहितेभ्यः स्थिरशरीरेभ्यः च अनुष्ठीयते । यतो हि अस्माकम् इदं शरीरम् अन्न-रसमयम् अस्ति । अतः रसमयस्य अस्य शरीरस्य रोगनिरामयः रसेन एव करणीयः । तदर्थम् एव रसस्य प्राधान्यं सर्वकाले वर्तते । संसारे विशिष्ट-स्थानीयाः व्यक्तयः विशिष्टेन उपाधिना भूषिताः भवन्ति । यथा नरेषु यः इन्द्रः (श्रेष्ठः) भवति सः भवति नरेन्द्रः (राजा) । एवमेव पशुषु यः श्रेष्ठः सः मृगेन्द्रः (सिंहः) भवति । तथैव बहुविधेषु रसेषु सत्सु अपि रसानां यः इन्द्रः (श्रेष्ठः) सः तु **पारदः** एव । अतः सर्वेषु रसेषु पारदः एव श्रेष्ठः भवति । रसानां राज्ञः एतस्य पारदस्य पर्यायवाचीनि त्रयस्त्रिंशत्[12] नामानि राजनिघण्टौ वर्णिताः सन्ति यथा - रसराजः, रसनाथः, महारसः, **रसः**, महातेजा, रसलोहः, रसोत्तमः, सूतराट्, चपलः, जैत्रः, शिवबीजम्, शिवः, अमृतम्, **रसेन्द्रः**, लोकेशः, धूर्त्तरः, प्रभुः, रुद्रजः, हरतेजः, रसधातुः, अचिन्त्यजः, खेचरः, चामरः, देहजः, मृत्युनाशनः, स्कन्दः, स्कन्दांशकः, सूतः, देवः, दिव्यरसः, रसायनश्रेष्ठः, यशोदः पारदः चेति ।

## रसस्य भेदाः

---

9 तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ली

10 स्थूलशरीरसमष्टुपहितचैतन्यम् इति वेदान्तसारः ।

11 चरकसंहिता

12 पारदो रसराजश्च रसनाथो महारसः ।
रसश्चैव महातेजा रसलोहो रसोत्तमः ॥
सूतराट् चपलो जैत्रः शिवबीजं शिवस्तथा ।
अमृतञ्च रसेन्द्रः स्याल्लोकेशो धूर्त्तरः प्रभुः॥
रुद्रजो हरतेजश्च रसधातुरचिन्त्यजः ।
खेचरश्चामरः प्रोक्तो देहदो मृत्युनाशनः ॥
स्कन्दः स्कन्दांशकः सूतो देवो दिव्यरसस्तथा ।
प्रोक्तो रसायनश्रेष्ठो यशोदस्त्रित्रिधाह्वयः ॥ (राजनिघण्टुः, सुवर्णादिवर्गः)

महादेवात् समुत्पन्नः एषः धातुः क्षेत्रभेदेन पञ्चविधः[13] भवति। यथा रसः, रसेन्द्रः, सूतः, पारदः मिश्रकः च इति। **रसः** इत्यस्य वर्णः लोहितः भवति। एषः सर्वविधैः दोषैः रहितः रसायनः च भवति। अस्य सेवनेन देवताः रोगात्, जरायाः मृत्योः च विमुक्ताः भवन्ति। **रसेन्द्रः** इति स्वभावात् एव निर्दोषः, कपिशः (कृष्ण-पीत-मिश्रवर्णः), रूक्षः अतीव निर्मलः च भवति। अस्य भक्षणेन नागाः[14] अपि जरायाः मृत्योः च विनिर्मुक्ताः भवन्ति। मनुष्याः एनं खादित्वा यथा अजराः अमराः च न भवेयुः तदर्थं देवताः नागाः च रसस्य कूपं रसेन्द्रस्य कूपं च मृत्तिकया प्रस्तरेण च पूरितवन्तः। तदा प्रभृतिः एतौ द्विप्रकारौ पारदौ मनुष्याणां कृते दुर्लभौ जातौ। **सूतः** किञ्चित् पीतवर्णीयः, रूक्षः तथा च दोषयुक्तः भवति। यदा एषः अष्टादश-संस्कारैः[15] सिद्धः भवति तदा मनुष्यशरीरं लौहवत् निर्माति। एवञ्च यः चतुर्थे कूपे तिष्ठति सः **पारदः** इति कथ्यते। एषः चञ्चलः तथा च श्वेतः भवति। बहुविधैः प्रयोगैः एषः सर्वान् रोगान् विनाशयति। मिश्रकः इति नामकः पारदः मयूरपक्षस्य वर्णः इव वर्णयुक्तः भवति। एषः सरसः अपि भवति। अष्टादशभिः संस्कारैः सिद्धत्वात् एषः सिद्धिप्रदः भवति। सूतः पारदः चेति द्वौ शब्दौ व्यक्तिवाचकौ जातिवाचकौ च भवतः। यथा तृणशब्दः व्यक्तिवाचकेन तृणविशेषः किन्तु जातिवाचकेन सर्वतृणनिष्ठा तृणजातिः चेति भवति।

## रसनिरुक्तिः

१. **रसनात्सर्वधातूनां रस इत्यभिधीयते।**
**जरारुङ्मृत्युनाशाय रस्यते वा रसो मतः॥**[16]

सुवर्ण-रजतादिभ्यः धातुभ्यः द्रवरूपं प्रदातुं सर्वेभ्यः धातुभ्यः उत्कर्षं च विधातुं पारदः एव रसशब्देन विज्ञायते। अपि च जरा, व्याधिः मृत्युः च इत्येतान् नाशयितुं समर्थत्वात् एषः **रसः** इत्युच्यते।

२. "रसोपरसराजत्वाद्रसेन्द्र इति कीर्तितः"[17]- अर्थात् अभ्रकादिषु अष्टसु महारसेसु गन्धकादिषु उपरसेषु च श्रेष्ठत्वात् एषः **रसेन्द्रः** अपि कथ्यते।
३. "देहलोहमयीं सिद्धिं सूते सूतस्ततः स्मृतः"[18] - अर्थात् शरीराय लौहवत् दृढां सिद्धिं प्रदातुं एषः **सूतः** इति नाम्ना अपि परिचीयते।
४. "रोगपङ्काब्धिमग्नानां पारदानाच्च पारदः"[19] – अर्थात् व्याधिरूपे पङ्कस्य समुद्रे निमज्जमानान् मनुष्यान् पारं नयति इत्यतः एषः **पारदः** इति उच्यते।
५. "सर्वधातुगतं तेजोमिश्रितं यत्र तिष्ठति"[20] - यत्र सर्वविधानां धातूनां तेजः गुणाः वा मिश्रितरूपेण वर्तन्ते तत्र सः (रसः) **मिश्रकः** इत्युच्यते।

## सर्वौषधानां पारदे[21] अन्तर्भावः

[13] रसो रसेन्द्रः सूतश्च पारदो मिश्रकस्तथा। इति पञ्चविधो जातः क्षेत्रभेदेन शम्भुजः॥ (र.र.स. -१.६७)
[14] मानवाकृतिफणलाङ्गूलविशिष्टवासुकीप्रभृतयः सर्पाः (बोधिनीटीका, र,र,स. - १.६९)
[15] स्वेदन-मर्दन-मूर्च्छनोत्थापन-पातन-बोधन-नियमन-दीपनानुवासनम्। गगनादि-ग्रास-प्रमाणचारण-गर्भद्रुति-बाह्यद्रुति-जारण-रञ्जन-सारण-क्रामणवेधभक्षणानीति॥ (रसेन्द्रचिन्तामणिः)
[16] र.र.स. १.७६
[17] र.र.स. १.७७
[18] र.र.स. १.७७
[19] र.र.स. १.७८
[20] र.र.स. १.७८
[21] संसारस्य जरामरणसंकटादिभ्यः पारं ददाति इति।

श्रीवाग्भटाचार्येण विरचिते रसरत्नसमुच्चये उक्तं यत् –

**काष्ठौषध्यो नागे नागो वङ्गेऽथ वङ्गमपि शुल्बे।**
**शुल्बं तारे तारं कनके कनकं च लीयते सूते ॥**[22]

अर्थात् काष्ठादीनां मूलं नागे (सीसायां), नागः वङ्गे (टिन), वङ्गं शुल्बे (ताम्रे), ताम्रं रजते, रजतं कनके कनकञ्च पारदे अन्तर्भवति। यथा योगिनः शिवस्य पादपद्मे लीनाः भूत्वा जन्म, मृत्युः, जरा व्याधिः च इत्यादिभ्यः रोगेभ्यः मुक्ताः भवन्ति अमृतत्वं च लभन्ते तथैव अभ्रकस्य ग्राहकः पारदः पूर्णतया सुवर्णादीन् अन्यान् धातून् आत्मनि समाविष्टान् करोति।

## जीवन्मुक्तेः साधनार्थं पारदः

(जरामरणसङ्कटादिभ्यः) पारं ददाति इति विग्रहे क-प्रत्यये कृते **पारद**शब्दः निष्पन्नः भवति। यथा अस्मिन् अनित्ये संसारे अन्ततः सर्वे प्राणिनः परब्रह्मणि[23] एव लीनाः भवन्ति तथैव रसानां राज्ञि पारदे सर्वे महारसाः, उपरसाः च समाविष्टाः भवन्ति। अपि च अयं पारदः शरीराय अजरत्वम् अमरत्वं च प्रददाति। अर्थात् परब्रह्मणः समुपासनया यत् अजरत्वरूपम् अमरत्वरूपं च फलं लभ्यते तदेव फलम् अत्रापि अस्ति। अतः पारदः स्वयं ब्रह्मस्वरूपम् इति सुधीभिः स्वीक्रियते। मनुष्याः पारदस्य सेवनात् अनन्तरं स्वस्थं देहं प्राप्नुवन्ति। ततः महर्षिगौतमेन प्रतिपादितैः अष्टविधैः गुणैः[24] सह संयुज्य यथार्थज्ञानं लब्ध्वा मनुष्याः ब्रह्मपदम् अधिगच्छन्ति। तस्मात् ते पुनरुत्पत्तिजनितानि वासनाजनितानि च दुःखानि न प्राप्नुवन्ति। अचिरेणैव मोक्षाधिकारिणः अपि भवन्ति।

## पारदस्य महिमा

पारदस्य अपारः महिमा वर्तते। शतम् अश्वमेधयज्ञैः[25] अथवा कोटिसङ्ख्यकेन गोदानेन, सहस्रमणपरिमितेन सुवर्णदानेन अथवा सर्वेषु तीर्थेषु स्नानेन च यत् पुण्यं मिलति मनुष्याणां तत् पुण्यं केवलं पारदस्य दर्शनेनैव फलति। अपि च यः मनुष्यः पारदस्य शिवलिङ्गं विनिर्माय भक्त्या तत् पूजयति सः त्रिषु लोकेषु शिवलिङ्गपूजनेन यत् फलं लभ्यते तत् फलं प्राप्नोति। रसरत्नसमुच्चये अस्मिन् सन्दर्भे समुच्यते यत् -

**हन्ति भक्षणमात्रेण पूर्वजन्माघसम्भवम्।**
**रोगसङ्घमशेषाणां नराणां नात्र संशयः ॥**[26]
**पूर्वजन्मकृतं पापं सद्यो नश्यति देहिनाम्।**
**सुगन्धपिष्टसूतेन यदि शम्भुर्विलेपितः ॥**[27] इति

शास्त्रोक्तेन विधिना पारदः औषधरूपेण सेव्यते चेत् मनुष्याणां पूर्वजन्मनि कृतेभ्यः पापेभ्यः उत्पन्नाः रोगाः समूलं विनष्टाः भवन्ति इत्यत्र नास्ति कोऽपि संशयः। पारदस्य गन्धकेन सह पेषणं कृत्वा शिवलिङ्गस्य उपरि चन्दनवत् लेपनेन मनुष्याणां पूर्वजन्मनि कृतानि पापानि

[22] र.र.स. १.४०
[23] परमात्मनीव सततं भवति लयो यत्र सर्वसत्त्वानाम्।
एकोऽसौ रसराजः शरीरमजरामरं कुरुते॥ (र.र.स.१.४२)
[24] "सर्वभूतेषु दयाक्षान्तिरनसूयाशौचमनायासा मङ्गलमकार्पण्यमस्पृहाः"(बोधिनीटीका, र,र,स- १.४३)
[25] शताश्वमेधेन कृतेन पुण्यं गोकोटिभिःस्वर्णसहस्रदानात्।
नृणां भवेत्सूतकदर्शनेन यत्सर्वतीर्थेषु कृताभिषेकात्॥ (र.र.स.१.२३)
26 र.र.स. १.२५
27 र.र.स. १.२६

नश्यन्ति इति शास्त्राभिमतम् । परन्तु यः मनुष्यः परमोत्कृष्टं महादेवस्य तेजःस्वरूपं एतं पारदं निन्दति सः कल्पान्तं यावत् नरके एव भवति इति दिक् ।

******

## सन्दर्भग्रन्थसूची


१. त्रिपाठी इन्द्रदेव ( व्याख्याकारः), **राजनिघण्टुः**, चौखम्बा कृष्णदास अकादमी, वाराणसी, २०१६

२. शास्त्री श्री कविराज अम्बिकादत्त (व्याख्याकारः), **रसरत्नसमुच्चयः**, चौखम्बा अमरभारती प्रकाशन, वाराणसी, २०१५

३. दीक्षित श्रीकृष्ण (व्याख्याकारः), **रसार्णवम्**, चौखम्बा संस्कृत सिरिज् आफिस्, वाराणसी, २०१८

४. गौतम सिंह देवनाथ (व्याख्याकारः), **रसतरङ्गिणी**, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१८

५. मिश्र श्री ब्रह्मशङ्कर मिश्र (व्याख्याकारः), **भावप्रकाशः**, चौखम्बा संस्कृत भवन, वाराणसी, २०१८


*****